# भारतीय दर्शन में आत्म-मीमांसा

✡ श्री अरुणविजयो मुनि

जगतीतले बहवो धर्मा-दर्शनानि च सन्ति। विश्वदर्शनेषु भारतीयदर्शनान्यग्रिमस्थानारूढानि सन्ति। दर्शनक्षेत्रे दृष्टादृष्ट-सर्वेषां पदार्थानां तलस्पर्शिज्ञानमुपालम्भते। सर्वदर्शने जैनदर्शनमपि स्वतंत्रं प्राचीनं च परिगण्यते। अस्य प्ररूपका उपदेष्टार तीर्थंकरा आर्हताः। अतोऽमुमार्हतदर्शनमप्युच्यते। आर्हतार तीर्थंकरा आदिनाथमहावीरस्वामि भगवत् सदृशाः सर्वज्ञाः सर्वदर्शिन एव भवन्ति।

जैनदर्शनेप्यात्म-परमात्म, लोकालोकात्परलोककर्म-धर्मादिदृष्टादृष्टप्रभृतीनां सर्वेषां पदार्थानां विचारविषये सिद्धान्ताश्च दृश्यन्ते।

आस्तिकदर्शनानामुहापोहयोः केन्द्रस्थानं प्रायेण "आत्मा" अस्ति। प्रत्यक्षाभावातात्मविषये भिन्न-भिन्न दर्शनेषु भिन्ना-भिन्ना विचारधाराः प्रचलन्ति। दर्शनेतरैः साकं जैनदर्शनस्यात्मविषयकसिद्धान्तानां प्रस्तुते प्रबन्धे विमर्शः क्रियते।

आत्मज्ञानेनैवात्मप्रतीतिर्भविष्यति। आत्मज्ञानमेव मोक्षं प्रति कारणमस्ति। तच्चानुमानादि प्रमाणेनैव भविष्यति। सर्वज्ञोक्तागमादि शास्त्राणामालम्बनमेव प्रधानाधारो वर्तते। अत अर्हत सर्वज्ञोक्तागमाधारमवलम्ब्य तेषां वचनानुसारेण सिद्धान्तस्तुतिपूर्वकं शब्दकुसुमाञ्जलिर्भिजिनार्चनं प्रस्तुते प्रबन्धे क्रियते।

भगवतार्हता नवतत्त्वानि प्रतिपादितानि। तद्यथा—(१) जीवः (२) अजीवः (३) पुण्यम् (४) पापम् (५) आश्रवः (६) संवरः (७) निर्जरा (८) बंधः (९) मोक्षश्च[१]। एतेषु पदार्थेषु जीवाजीवौ पदार्थौ द्वावेव मूलतत्त्वे। अन्यानि तत्त्वानि अनयोरेव संयोग-वियोगजन्यावस्थाविशेष वाचान्येव। आर्हतेमतेऽनन्तधर्मात्मकं द्रव्यम्। तत् च गुणपर्यायात्मकम्[२], उत्पादव्यय ध्रौव्यात्मकस्वभावम्। **"उप्पन्नेई वा विगमेई वा धुवेई वा"** इतित्रिपदी भगवतोपदिष्टा।

ऐन्द्रियप्रत्यक्षदृष्ट वस्त्वस्तित्ववादिश्चार्वाका अदृष्टं नाङ्गीकुर्वन्ति, प्रत्यक्षगोचराभावात्। चैतन्यरहिता अजीवाः ते च प्रत्यक्षगोचराः। प्रत्यक्ष प्रियश्चार्वाकाश्चेतनायुक्तमात्मानं न स्वीकुर्वन्ति, अदृष्टत्वात्। ये ये दृष्टास्तेषां सत्तात्मकत्वं तैरङ्गीक्रियते, यथा घटपटादिकम्। चेतना-शक्तिर्भूतेष्वेव दृश्यते। अतःदेहाद् भिन्न आत्मनामको कश्चन पदार्थ एव नास्तीति भूतचैतन्यवादिनां-देहात्मवादिनामेव मतम्। ते च वदन्ति पृथ्वी-जलाग्नि-वाय्वादिभूतचतुष्टयेभ्यो विशिष्टरासायनिक संमिश्रणेभ्यश्चेतनाशक्तिरुद्भवति। शरीरवत् स एवात्मा, नान्यः।

यथा मध्वादि पदार्थानां बहुयाततयामत्वेन मदिरा भवति, तस्याञ्च मदशक्तिरागच्छति। तथैव भूतचतुष्टयानां विशिष्टसंयोगेन चैतन्यशक्तिरप्युद्भवति। अतश्चैतन्यं देहधर्म एव न चात्मनः। अत एव जीवनप्रवाहो गर्भकालादारभ्य मृत्युपर्यन्तमेवास्ति। अन्ते समये शरीरयन्त्रे विकृत्यागमने चैतन्यशक्तिर्नाशो भवति स एव मृत्युः।

ऐतिहासिक्यादृष्या भूतचैतन्यवादः प्राचीनतमोऽस्ति। उपनिषदि, जैनागमे, बौद्धपिटकेषु चास्योल्लेखः पूर्वपक्ष रूपेण निर्दिष्टः। जयन्तसदृशैः समर्थ नैयायिकैरप्यस्य चार्वाकरूपेण निर्देशो कृतः। एतत् सदृशं 'तज्जीवतत्शरीरवादस्योल्लेखः सूत्रकृताङ्गे, विशेषावश्यक भाष्ये तथैव च मज्झिमनिकायेप्युपलभ्यते।

भूतानां जडत्वन्तु चार्वाकैरप्यङ्गीक्रियते। जडेष्वेव चैतन्योत्पत्तिरिति तेषां मतम्। परमेतत् तर्कप्रमाणेन परीक्षिते न सिद्धान्तगामि भविष्यति। यतो हि भूत चैतन्ययोः कार्यकारणभाव इति पक्षमवलम्ब्य विचार्यते **कारणगत धर्मवैचित्र्यकार्ये** कथमागमिष्यति?

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यद्येताहृक् कार्यकारणभावेङ्गीक्रियते चेद् घट सामग्र्या पटस्योत्पत्तिर्भविष्यति। परं तथा प्रतीतिस्तु न दृश्यते। अतो जडात् चैतन्योत्पत्तिरिति व्यवहारस्त्वलीक एव।

तथा च चैतन्यं जडस्वरूपमित्यपि वक्तुं न शक्यते। व्यर्थपदार्थान्तरकल्पना गौरवाच्च। अतो भूतचैतन्यवादस्तु न तर्कसंगतः।

तथा च चैतन्यं न दृष्टम्। तत् त्वतीन्द्रियग्राह्यम्। अतएव तस्य स्वीकारो न कर्तव्य इति तेषां मतम्।

अदृष्टपदार्थस्यादृष्टताप्रतिपादकं किमपि प्रमाणं नास्ति। अतएव प्रमाणाभावात् प्रमेयस्यापि सिद्धिर्न भविष्यति।

परमत्र विचारणीयो विषयस्तु स एव यतो हि कुत्रापि अदृष्टः पदार्थो नास्ति। शशशृङ्गवदलीककल्पना गम्यमिति ये वदन्ति तेषां कथनं तु निरर्गलमेव। प्रत्यक्षादि-प्रमाणविचारावसरे प्रमाणगतपदार्थनां याथार्थ्याङ्गीकरणीयमेव। प्रत्यक्ष आत्ममनःसंयुक्तेन्द्रियस्यैव कारणता, तत्रेन्द्रियत्वं किमिति प्रश्ने-अलौकिक एव पदार्थ परिकल्पनीयो भवति। मृतदेहेष्विन्द्रियस्याधिष्ठानभूतस्य स्थाने सत्त्वेपीन्द्रिय द्वारा संपादिते व्यवहारेऽक्षमता दृश्यते। अतस्तत् तदिन्द्रियाश्रयीभूतं किंचिदृष्ट वस्त्वङ्गीकरणीयमेव। अतोऽदृष्टपदार्थानङ्गीकारे सर्वत्र प्रमाणाभावस्य संचारो भविष्यति। तेन च प्रमेयसिद्धिः कदापि न भविष्यति। किञ्च मेयाधीना मानसिद्धिरिति नैयायिकानां सिद्धान्तः। अतोऽदृष्यमिन्द्रियं प्रत्यक्षादि व्यवहारमूलकमिति तु सिद्धं भवति।

एतादृशेन विचारेण चार्वाकिस्तु सर्वथा परास्तो भविष्यति। अतश्चार्वाकिमतं तत्त्वज्ञान परिकल्पित तात्पर्य निर्यायार्थकिञ्चित्यकरमेव।

**जैनदर्शने आत्म लक्षणम्**

**"चैतन्यस्वरूपः परिणामी, कर्ता, साक्षाद् भोक्ता, देहपरिमाणः।**
**प्रतिक्षेत्रं भिन्नः पौद्गलिकादृष्ट्वांश्चायम्॥"**

परमश्रद्धेयैर्भगवत् पादैः श्रीमद्भिर्वादिदेवसूरिमहाराजैरात्मनो लक्षणमेतादृशं कृतम्। अस्मिल्लक्षणे प्रदत्त-विशेषणे दर्शनेतराणां निरासपूर्वकमार्हतसिद्धान्तस्योपबृहणं कृतम्। जिनानुयायिन आत्मनश्चैतन्यस्वरूपमुद्घोषयन्ति।

चेतना नाम 'आत्मशक्तिविशेषा'। चैतन्यमेवात्मनोऽसाधारणलक्षणम्। तदेव जीवाजीवयोर्विभेदकम्। अत उक्तं 'चेतना लक्षणो जीवः' इति। चैतन्यं साकार निराकारोपयोगाख्यम् तच्च ज्ञानदर्शनात्मकम् अनेन विशेषणेन चार्वाका-न्यायवैशेषिकाश्च परास्ताः।

नैयायिकानां मते आत्मा जड रूपः (ज्ञान-शून्यः) तथा चात्मज्ञानयोः सर्वथा भेदः परं समवायसंसर्गेनात्मज्ञानयोः संबन्धो भवति। यत आत्मतानयोरभिन्नः सम्बन्धः स्वीक्रियते चेत् ज्ञाननाशादात्मनाशोप्यङ्गीकरणीयमेव। परम-आत्मा तु नित्य द्रव्यत्वेन तैरेवाङ्गीकृत अतस्तयोरभेद रूपतात्वङ्गीकर्तुं न शक्यते नैयायिकैरपि।

तथा च रागद्वेषौ, मोह दोष प्रवृत्तिः जन्म दुःखं चैतेषां क्रमशोनाशे बुद्ध्यात्मगुणानां ध्वंसः, अन्ते चात्मनोऽपि नाश संभावना भवेत्।

तथा चात्मा कर्ता ज्ञानं च करणमित्यस्य व्यवहार लोपभयाद् कामतया तैरात्मज्ञानयोरभिन्नत्वं न स्वीक्रियते।

अत्रार्हताः "ज्ञानमया एवाऽयमात्मा" इति पक्षवादिनः। तथा च नैयायकाः "ज्ञानाधिकरणमात्मा" इति पक्षवादिनः।

आत्मज्ञानयोः सर्वथा भिन्नत्वं न युक्तम्। यतश्चैत्रमैत्रयोर्ज्ञानस्य पृथक्त्वात् मैत्रज्ञानेन चैत्रः पदार्थं नानुभवेत्। तथैव चैत्रस्य ज्ञानमपि चैत्रादभिन्नत्वात् चैत्रस्यज्ञानेनापि चैत्रस्यात्मनो ज्ञानं न भवेत्। अर्थात् यथा अन्यस्यज्ञानेनाऽस्माभिर्न ज्ञायते, तथैवाऽस्माकं ज्ञानेनापि वयं ज्ञातुं न शक्नुमः, भिन्नत्वात्।

यदि समवायेन ज्ञानमात्मनि तिष्ठति चेद्, तदेवज्ञानं तस्मिन्नेवात्मनि वस्तुबोधं कारयितु समर्थम्। अतश्चैत्रस्य ज्ञानं चैत्रादभिन्ने सत्त्वेऽपि समवाय सम्बन्धेन संयुक्तमस्ति अतो दोषनिरासः।

परमेतन्न्यायविरुद्धं मतम् यतो न्यायमत आत्मा सर्वव्यापकः कूटस्थोनित्यश्च। तथा च समवायोऽपि नित्यः सर्वव्यापकः। अतः एकस्य ज्ञानेन सर्वेषां ज्ञानं भवतु। परमेतद् व्यवहारे न दृश्यते, यथा घटे घटरूपे च समवाय सम्बन्धः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सत्वात्, घटरूप नाशे तदाधारस्यापि नाशो भविष्यति। तथैवात्मना साकं समवायेन सम्बन्धेन सम्बन्धिज्ञानस्य नाशे आत्मनोऽस्तित्वेऽप्यापत्तिरापतिष्यति। नित्यतायास्तु प्रश्न एव नोद्भवति।

यद्यात्मज्ञानयोः समवाये समवायेतरस्य कल्पना क्रियते चेदनवस्थादोषापत्तिः।

स्व-परप्रकाशकप्रदीप दृष्टान्तदानेन समवायः स्वस्वभावेनैवात्मज्ञानयोः स्वेन साकं सम्बध्यते, एतदपि युक्त्य-संगतम्। यतो न्यायमते धर्म-धर्मिणौ सर्वथा भिन्नौ स्तः। येन तेजो यस्य द्रव्यं, प्रकाशश्च यस्य धर्मः तेन प्रदीपदृष्टान्तेन युक्तिर्न संभवति। कारणम्, एकान्तेन भेदः स्वीकारे प्रदीप एवं कथं भवति ? यदि न्यायमते प्रदीपस्य स्वपर-प्रकाशकत्व-मेव न सिद्ध्यति, ततोऽस्याधारे समवायस्य सिद्धिः कथं संभवेत्। तथा च यावत् समवायो न सिद्ध्यति तावदन्या ऊहा-पोहौ वायुतरङ्गवत् निराधारौ।

समवायस्य स्वपर-प्रकाशकः स्वभाव एव, समवायेन भिन्नो वाऽभिन्नो वा ? आद्यपक्ष स्वीकार उभयमपि समवायस्य स्वभाव-स्वरूपमिति कथं भवेत् ? अस्याधारेऽन्यतर समवाय कल्पनापि कर्तुं न शक्यते ! अनवस्थादोषा-गमात्।

द्वितीयेऽभिन्ने पक्षे स्वभावास्तित्वं विना समवायमात्रमेवावशिष्टं भवति।

समवायिषु यदि समवायस्य ज्ञानं समवायान्तरेण विना स्वत उद्भवति चेद् "आत्मविज्ञानं" इति प्रतीतौ समवा-यस्य काऽवश्यकता ? अतो ज्ञानम् आत्मनः सर्वथा भिन्नं नास्ति। आत्मनि चैतन्यं भिन्नाभिन्नत्वेनाङ्गीकरणीयम्। सर्वेषां वस्तूनामनैकांतिकत्वात्। न तु सर्वथा भिन्नं न च सर्वथाऽभिन्नम्। एकान्त भिन्नपक्षे "अहं सुखी, अहं दुःखी, अहं जानामि" प्रभृत्याभेद प्रतिभासः कथं भवेत् ? तथैव सर्वथाऽभिन्नपक्षे, आत्मा स्वरूपी चैतन्यं च तस्य स्वरूपमस्ति, एतादृक् भेदा-भाव आगमिष्यति।

आत्मनोस्तित्वस्य सिद्ध्यर्थं चैतन्यकारकं ज्ञानमेय स्थायी गुणः। अस्याभावे सिद्धेरभावः।

**परिणाम्यात्मा—**

परिणमनं प्रतिसमयमपरापरपर्यायेषु गमनं परिणामः स नित्यमस्यास्तीति परिणामी।

**परिणामोऽवस्थान्तर गमनं न च सर्वथा ह्यवस्थानम्।**
**न च सर्वथा विनाशः, परिणामस्तद्विदामिष्टः॥**

पातञ्जल टीकाकारोप्याह—"अवस्थितस्य द्रव्यस्य पूर्वधर्म-निवृत्तौ धर्मान्तिरोत्पत्तिः परिणामः इति।"

अनेन परिणामी विशेषणेन नैयायिकानां कूटस्थनित्यतामतं तिरस्कृतम्। कूटस्थनित्यवादिनो नैयायिका नित्य-आत्मनि कर्तृत्वं भोक्तृत्वं, जन्म-जरा-मृत्वादिकमपि संभवतीत्यामनन्ति। यथा ज्ञानमिच्छादीनां सम्बन्धेन कतृत्वं सुख-दुःखादीनां सम्बन्धेन वियोगेन च जन्म-मृत्यू भवतः।

परमेतन्नयुक्तिसंगतम्—पूर्वावस्थाऽभावे उत्तरावस्थायाः प्राप्तिः सम्बन्धमित्युच्यते। तथा च कूटस्थ नित्यपक्षे संबन्धस्य संभावनैव कथं भवेत्। सम्बन्धेन बिना सम्बन्धिषु कर्तृत्वस्य भोक्तृत्वस्य च प्रलापो व्यर्थ एव। पूर्वावस्थाया परित्यागेन विना ज्ञानादीनां समवायस्योत्पत्तिः स्वीकारे वन्ध्य पुत्र जन्मोत्सववत् भविष्यति।

तथा च ज्ञानोत्पत्तिसमयेऽपि पूर्वावस्थावदेवात्मा परिकल्प्यते, पूर्वावस्थायां परिच्छेदकाभाववानासीत्, अनन्तरं च ज्ञानोत्पत्तिसमये पदार्थपरिच्छेदकत्वं कथं संभवति ?

कारणं प्रतिनियतस्वरूपाप्रच्युतिरूपत्वं कौटस्थ्यम्। आत्मनि पदार्थपरिच्छेदकत्वं मन्यमाने, प्रथमं योऽप्रमा-ताऽसीत् सैवाधुना प्रमातृत्वेन परिणतः। अनेन तु कूटस्थनित्यता कथं संभवेत् ? अपरापरपर्यायेषु गमनेनाऽत्मनोऽवस्था परिवर्तते। गुणोऽयं जडे नोपलभ्यते, अतः परिणाम्यात्मा।

**कर्ता, साक्षाद् भोक्ता—**

कर्ता, साक्षाद भोक्तेति विशेषणयुगलेन कापिलमतं भिद्यतेः। तथाहि कापिलाः कर्तृत्वं प्रकृते प्रतिजानीते न पुरुषस्य। पुरुषस्तु—

**अमूर्तश्चेतना भोगी, नित्यः सर्वगतोऽक्रियः।**
**अकर्ता निर्गुणः सूक्ष्म, आत्मा कापिल्यदर्शने॥**

अन्धपङ्गुवत् प्रकृति पुरुषयोः संयोगः। चिच्छक्तिश्च विषयपरिच्छेदशून्या। यत इन्द्रियद्वारेण सुख-दुःखा-दयो विषयाः बुद्धौ प्रतिसंक्रामन्ति बुद्धिश्चोभयमुखदर्पणाकारा। ततस्तस्यां चैतन्यशक्तिः प्रतिबिम्बते। ततः सुख्यहं दुख्यहं मित्युपचारः। आत्मा बुद्धेरव्यतिरिक्तमभिमन्यते।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आह च पतञ्जलिः—"शुद्धोऽपि पुरुषः प्रत्ययं बौद्धमनुपश्यति । तमनुपश्यन् न तदात्मापि तदात्मक इव प्रतिभासते" इति । चिच्छक्तिसन्निधानाच्चाचेतनापि बुद्धिश्चेतनावतीवावभासते । वादमहार्णवोप्याह—"बुद्धिदर्पणसंक्रान्तमर्थ प्रतिबिम्बकं द्वितीयदर्पणकल्पे पुंस्यध्यारोहति । तदेव भोक्तृत्वमस्य न त्वात्मनो विकारापत्तिरिति पूर्व पक्षः ।"

अथ—पुरुषोऽगुणोऽपरिणामी चेद् कथमस्य मोक्षोभविष्यति ? 'मुच्' धातोर्बन्धन विश्लेषार्थत्वात् बन्धस्यैव मोक्षो-भविष्यति । अपरिणाम्यात्मनि वासनाक्लेशकर्मणा संबंधेन बन्धस्योत्पत्तिरेव न संभवति अत एवाऽत्मनो निष्क्रियत्वे परलोकः संसारादिकमपि न भविष्यति ।

सत्वेऽपि चैतन्य शक्तिः सा विषय परिच्छेदशून्येति परस्परं विरुद्धं वचः । 'चिति संज्ञाने' इति ज्ञानार्थे 'चित्' धातु प्रयुक्तः । **चित्यते अनयेति चैतन्यमस्ति ।** यदीयं शक्तिः स्वपरप्रकाशिका नास्ति चेद् कथं सा चेतनाशक्तिरुच्यते, यथा घटः । चेतनाशक्तेः प्रतिबिम्बं बुद्धवागन्तु नार्हति, मूर्तधर्मत्वात् । मूर्तपदार्था एव प्रतिबिम्बन्ते ।

आत्मगतसुखदुःखानामनुभवो निराधार एव, आत्मनासाकं तेषां सम्बन्धाभावात् । यदि सुखदुःखयो ज्ञानं बुद्धिजन्यमुच्यते चेद् तदप्ययुक्तम् । सांख्यमते बुद्धेर्जडत्वात् । सुखदुःखादीनामनुभाविका सत्वेपि बुद्धेर्जडत्वकल्पने विरोधाभासो भविष्यति । बुद्धेर्जडत्वकल्पने ज्ञेयपदार्थानां ज्ञानाभावो भविष्यति ।

यद्यात्माऽकर्तास्ति चेद् भोक्ता-अनुभवितापि कथं भवेत् ? दृष्ट व्यवहारेऽपि कर्ताएव सफल भोक्ता भवति । अन्यस्य क्रिययाऽन्यस्य तृप्तिः कथं भवेत् ? यथा चैत्रस्य भोजनेन मैत्रस्य तृप्तिः, एतादृशो व्यवहारो नावलोक्यते । भोक्तृत्व कर्तृत्वे कार्यकारणभाव सम्बन्धो दृश्यते । भोक्तृत्वं कार्यान्तरगतं, कर्तृत्वं च कारणान्तर्गतम् । यथा घटकार्यसत्वे मृत्तिकादिकारणमस्त्येव, तथैव भोक्तृत्वानुगतं कर्तृत्वम् । भोक्तृत्वाङ्गीकृते कर्तृत्वमवश्यमङ्गीकरणीयमेव ।

'अचेतनापि बुद्धिश्चिच्छक्ति सानिध्याच्चेतनावतीवावभासते इत्यप्ययुक्तं प्रतिभाति । यथा यस्मिन्दर्पणे प्रतिबिम्बयते तस्मिन्दर्पणेऽपि चेतनापत्तिरापतिष्यति । तथा च चैतन्याचैतन्ययोरपरावर्तिस्वभावत्वेन पुरन्दरेणाप्यन्यथा कर्तृमशक्यत्वात् । किञ्चाऽचेतनापि चेतनावतीव प्रतिभासत इति 'इव' शब्देनारोपो ध्वन्यते । न चारोपोऽर्थक्रियासमर्थः । यथाऽतिकोपनत्वादिना समारोपिताग्नित्वो माणवकः कदाचिदपि मुख्याग्नि साध्यां दाहपाकाद्यर्थक्रियां कर्तुं न समर्थ इति चिच्छक्तेरेव विषयाध्यवसायो घटते न जडरूपाया बुद्धेरिति ।

अत एव धर्माद्यष्टरूपताप्ति तस्य वाङ्मात्रमेव । धर्मादीनामात्मधर्मत्वात् । अत एव चाहङ्कारोपि न बुद्धिजन्यो युज्यते, तस्याभिमानात्मकत्वेनात्मधर्मस्याचेनादुत्पादायोगात् ।

इत्यादि विचारानुसारेण कर्तृत्वं साक्षाद् भोक्तृत्वं च युक्तिसङ्गतं दृश्यते ।

**स्वदेह परिमाणः**

स्वदेह परिमाण—इत्यनेनापि नैयायिक वैशेषिक सांख्यादि-परिकल्पितमात्मनः सर्वगतत्वं निषिध्यते ।

नैयायिक-वैशेषिक-सांख्य प्रभृतिभिर्दर्शनैरात्मनो विभुत्वं सर्वगतत्वमङ्गीक्रियते । अद्वैतवादिनोऽप्यात्मान एकत्वं विभुत्वं चाङ्गीकुर्वन्ति । देहाद् बहिरप्यात्मा सर्वत्र वर्तते सर्वव्यापकत्वादिति तेषां मतम् ।

परं यद्यात्मनः सर्वव्यापकत्वमङ्गीक्रियते चेदात्मेतर पदार्थानां सत्त्वैव कथं संभवति । तथा च एकात्मनि-अहं सुखी, अहं दुःखी, अहं ज्ञानी इत्याकारके प्रत्यये जाते सर्वात्मनि समानरूपेण सुख-दुःखादि ज्ञानं भविष्यति, सर्वव्यापकत्वात् । एकेन भोजनेकृतेप्यन्येषां सर्वेषां क्षुत्तृप्तिरपेक्ष्यते । परं लोक-व्यवहारेऽपि तथा नावलोक्यते । तथा च सुख-दुःखादीनां संवेदनापि सदृशाः समकालीना च भवतु, आत्मनः सर्वव्यापकत्वात् । यद्यात्मा सर्वव्यस्ति चेद्—एक समयावच्छेद एव नृदेवतिर्यङ् नारकगतीनां भावाभावानां सुख-दुःखादि संवेदनानां ज्ञाता भविष्यति ।

परं सर्वासु गतिषु सुख-दुःखादीनां वैषम्यमनुभूयते । एकस्य बन्ध-मोक्ष प्रसंगे सर्वेषां तथैव भवतु । न च तथा दृश्यते । सर्वे जीवाः स्वस्वकर्मविपाकानुसारेण बन्ध मोक्षं प्राप्नुवन्ति ।

इत्थं देहाद्बहिः सर्वव्याप्यात्मवादे महत्यापत्तिरापतिष्यति । तथा च देहबाह्यात्मवाद आत्माकाशयोः को भेदो भविष्यति ? व्योमवदात्मविभुवाद आत्मनि क्रियापि कथं सम्भविष्यति ? अनेन च संसारास्तित्वमेव गच्छति । तथा चात्मविभुवाद ईश्वर मतवादिन आत्मनि जगत्कर्तृत्वं कथं न स्वीकुर्वन्ति ? उभयव्यापकत्वात् । यद्यात्मैवेश्वर ईश्वरैवात्मेत्युच्चते चेदात्मनि कर्तृत्वापत्तिरापतिष्यति । कर्तृत्वं तु समान स्वरूपं भविष्यति, अतः पापनरकादिवद भद्ररूपमीश्वरात्मनो भवेत् ।

भावार्थस्त्वयमात्मा सर्वगतो न भवति, सर्वत्र तद्गुणानुपलब्धेः । यो यः सर्वत्रानुपलभ्यमानगुणः स सर्वगतो न भवति, यथा घटः तथाचाऽयम्, तस्मात् तथा व्यतिरेके व्योमादि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा च न्याय कन्दल्यां श्रीधर भट्टेनोक्तं—

**"सर्वगतत्वेऽप्यात्मनो देह प्रदेशे ज्ञातृत्वम्, नान्यत्र।**
**शरीरस्योपभोगायतनत्वात् अन्यथा तस्य वैधर्म्यादिति ॥"**

तथा चात्मनो बुद्ध्यादयोगुणाः शरीरमेवोपलभ्यन्ते। अतो गुणिनापि (आत्मना) तत्र भाव्यम्।

यथा अन्ययोग व्यवच्छेद द्वात्रिंशिकायामुक्तं हेमचन्द्राचार्येण यत्—

**"यत्रैव यो दृष्टगुणः स तत्र कुम्भादिवन्निष्प्रतिपक्षमेतद्।**
**तथापि देहाद् बहिरात्मतत्त्वमतत्त्ववादोपहता पठन्ति ॥"**

यथा कुम्भादेर्यत्रैव देशे रूपादयो गुणा उपलभ्यन्ते, तत्रैव तस्यास्तित्वं प्रतीयते, नान्यत्र। एवमात्मनोऽपि गुणाश्चैतन्या द्योदेहे एव दृश्यन्ते न बहिः।

अतस्तनुपरिमाण एवाङ्गीकर्तव्यो न व्यापकः। चेतनत्वात्, यत्तुव्यापकं, न तत् चेतनम्-यथा व्योम चेतनश्चात्मा तस्मात् न व्यापकः। अव्यापकत्वे चास्य तत्रैवोपलभ्यमानगुणत्वेन कायप्रमाणता सिद्धा भवति।

आर्हतमते समुद्घाताख्या क्रिया वर्तते। सा चाल्पाधिककर्म पुद्गल परमाणूनां तुल्यीकरणार्थं क्रियते। अतोऽष्टसमयसाध्य केवलि समुद्घातदशायां चतुर्दश रज्वात्मक [त्रिखंडलोक ब्रह्मांडात्मक], व्यापित्वेनात्मनः कथंचित् सर्वव्यापकत्वमार्हतैः स्वीक्रियते। सा च क्रिया कादाचित्कीति न तेन व्यभिचारः।

**प्रतिक्षेत्रं विभिन्न**—मित्यनेन विशेषणेनात्मनः शरीरवाच्छिन्नत्वस्य विचारः कृतः। अधुना दृश्यमानानां शरीराणां संख्या बाहुल्यादात्मनोऽपि संख्या बाहुल्यमङ्गीकरणीयम् यत्र-यत्र सक्रियं शरीरं, तत्र-तत्र आत्मा यथा नृपश्वादीनाम्।

अनन्तात्मवादिनो जिनानुयायिनः प्रतिक्षेत्रं प्रतिशरीरं विभिन्न-विभिन्नात्मनोऽस्तित्वमङ्गीकुर्वन्ति।

**"एग सरीरे एगो जीवो, जेसिं तु ते य पत्तेया"**

प्रत्येक जीवानां शरीरे एक एवात्मा तिष्ठति। प्रतिशरीरमात्मनो भिन्नत्वात्, अनन्तात्मार्हतदर्शने दृश्यते। ते च प्रत्यक्ष सिद्धाः। शरीरमाश्रित्य "इन्द्रिय व्यवहारानुसारेण जीवानां बहवो भेदोपभेदा जैन जीवविज्ञाने दर्शिता।" श्रीमद् मध्वाचार्येण सर्वदर्शनसंग्रहे सप्ततितमे पृष्ठे समीचीनमुल्लेखितम्। जिज्ञासुभिर्द्रष्टव्यम्।

सक्रिये देहे चेतनाया अनुमानानुभूतित्वात्। सर्वेषु देहेषु आत्मनः स्वतन्त्रास्तित्वमङ्गीकरणीयम्। अत एकेतरदेहभिन्नसिद्धेरनेकात्मनोऽपि सिद्ध्यति। तथा चैक आत्मा जलेन्दुबिम्बवदुपाधिभेदात् नानारूपे प्रतिभासते, इत्यद्वैतमतेप्यापत्तिरागमिष्यति। सर्वेषु प्रतिबिम्बेषु सुख-दुःखादीनां समानरूपता।

तथा चाऽगमेतर प्रमाणानामप्यभावत्वेन प्रत्यक्षप्रमाणेन व्यवहारसिद्धा बहवः पदार्था सन्ति। ते च स्वीकारार्हाः। अनेन चाद्वैतस्य सत्ताऽपि स्थातुं नार्हति।

**पौद्गलिकादृष्टवानिति**—विशेषणं नास्तिकादिमतं निरसितुं दत्तम्। नास्तिकमतवादनश्चार्वाका अदृष्टं नाङ्गीकुर्वन्ति, अदृष्टस्य प्रत्यक्षाभावादित्युच्यते। चेद् स्वपितामहः प्रपितामहादिष्वभावस्वीकर्तव्या, दीर्घकाले जातानां चक्षुगोचराभावात्। तेषामभावे भवतोऽप्यभावो भविष्यति, पितुरभावे पुत्राभावः।

तथा च '**अदृष्ट सिद्ध्यर्थं**' अदृष्टेतरकारणत्वेनाङ्गीक्रियते चेद्, अनवस्थादोषागमो भविष्यति।

"पौद्गलिका दृष्टवान्" इत्यतः पुद्गलघटित कर्म परतन्त्रोऽर्थोऽस्ति। नैयायिकानां मते, अदृष्टेन ये धर्माधर्माः स्वीक्रियन्ते तेषामप्यत्र पौद्गलिकत्वेन विशिष्टा विचारा भविष्यन्ति। पुद्गलाः—इति=पूरण-गलन स्वभावयुक्ताः परमाणवो ये पौद्गलिकास्तेषां पुण्यपापानां (धर्माधर्माणां) यः कर्ता स एवात्मा।

यथा शास्त्रवार्तासमुच्चये हरिभद्रसूरिचरणैर्लिखितं यत्—

**"यः कर्ता कर्मभेदानां भोक्ता कर्मफलस्य च।**
**संसर्ता परिनिर्वाता, सह्यात्मा नान्यलक्षणः ॥"**

पुद्गलघटितकर्माणां यः कर्ता, कर्मणो, भेदोपभेदानां यो बन्धकस्तथा च तेषां पुण्यपापात्मक शुभाशुभकर्मणां विपाकानां यो भोक्ता—अनुभविता स एवात्मा। पौद्गलिकं चेदमः—आत्मनः पारतन्त्र्यनिमित्तत्वात् निगडादिवत्। क्रोधे राग-द्वेषाद्यात्म परिणामरूपाणां पारतन्त्र्यस्वभावत्वात्, तन्निमित्तभूतस्य तु कार्मणः पौद्गलिकत्वात्।

पूर्वकर्म विपाकवशगो हि प्राणी रागद्वेषादिना प्राणव्यपरोपणादि हिंसाकार्याणि कुर्वाणः कर्मणा बध्यते।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"कायवाङ्मन कर्मयोगः" सकषायत्वाज्जीवः कर्मणोयोग्यान् पुद्गलनादत्ते "**शुभः पुण्यस्य**" "**अशुभः पापस्य**" इत्यादीनि प्रमाणानि प्रसिद्धान्येव।

तथा च वृद्धशरीरं प्रति तरुणशरीरं कारणम्। तारुण्यं प्रति च बाल्यशरीरं बाल्यशरीरं, प्रति गर्भात्मकं शरीरं कारणं भविष्यति। तदनन्तरं तद् गर्भरूपं शरीरं प्रति किं कारण रूपं भवितुमर्हति ?

गर्भरूपं शरीरं प्रति पूर्व जन्मनः कार्मणशरीरमेव कारणं भवति, नेतरत्। इदमेव कार्मणशरीरं, पौद्गलिकं, सूक्ष्मरूपं च तदेवादृष्टनिर्मितम्, जैनमतेऽदृष्टस्वीकारे परलोक पुनर्जन्मादीनामपि स्वीकारो भविष्यत्येव।

पौद्गलिकमदृष्टं मूर्तम् जडत्वात्। मूर्तकर्मणा अमूर्तात्मा कथं बध्यते ? अनुग्रहोपघातादिकं च कथं सम्भवति ? यथा अमूर्ते आकाशे मूर्तचन्दनादीनां विलेपनेनानुग्रहस्तथा च खड्गादिप्रहारेणोपघातादिकमपि न सम्भवति।

तत्र भवता मयं पक्षोऽपि स्वमतं साधयितुं न समर्थः। यतो मूर्तं ब्राह्मीमदिरा मदादीनां सेवनेनाऽमूर्तं ज्ञानस्यानुग्रहोपघातादिकं प्रत्यक्ष अनुभूयते।

स्याद्वादमते—आत्मा एकान्तामूर्तोऽपि नास्ति यतोऽनादि कर्म सन्तत्या स परिणामान्तरं गतः। यथोऽग्निना-साकमयपिण्डस्य संयोगः क्षीरनीरवदात्मककर्मणो संयोगेन वात्मापि तद्वत् प्रतिभासते; यथा दुग्धे जलं दुग्धवदेव भासते। अतो मूर्त कर्मणासाकं कथंचिदभिन्नत्वात् (संसारावस्थायाम्) आत्मापि कथंचित् मूर्तत्वेन प्रतिभासते। अन्यथाऽकाश आपत्तिरागमिष्यति। अतः सर्वथाऽमूर्तत्वादाकाशस्योपरि मूर्ता नामनुग्रहश्चोपग्रहो नास्ति। कथंचित् मूर्तामूर्तत्वादेवाऽत्मनि मूर्तकर्मणोऽनुग्रहश्चोपग्रहः सम्भवतीत्यार्हते पौद्गलिका दृष्टत्वमङ्गीकृतम्।

यथा चागम प्रमाणम्—

**जीवो अणाइ अणिधणो अविणासी धुओ, निच्चं** —इति भगवत्यागमे।

जीवात्मानः कालापेक्षयाऽनाद्यनन्ताः, अर्थात् यस्योत्पत्तिर्नाशश्च नास्ति, स एव जीवः। अनुत्पन्नाः पदार्था अनादिसिद्धाः। अनिधनः—निधनं मृत्युः, यस्य मृत्युः (अयः) नास्ति सोऽनिधनः। मृत्यु धर्मो देहस्य न त्वात्मनः। देहात्मनो वियोग एव मृत्युरित्युच्यते। यस्योत्पत्तिः तस्यैव नाशः गीतायामापि "जातस्य ध्रुवो मृत्यु" रित्युक्तम्। जन्म ग्रहणे देहोत्पत्तिर्भवति, अतोऽस्यैव क्षयः मृत्युर्भविष्यति।

अविनाशी—आत्मा अविनाशी वर्तते। केनाप्याघात प्रत्याघातेनास्य नाशो नैव भविष्यति।

अग्निना न दह्यते, न च वज्रेण हन्यते, न च पर्वतेभ्यो भिद्यते, छुरिकया न च छिद्यते। अतोऽछेद्या-काट्या-दाह्याभेद्यादि स्वभाववानात्मा जिनमते।

अक्षयः—सर्वदा सर्वस्मिन् कदापि यस्य क्षयोनास्ति स एवात्मा।

"ध्रुवो नित्यम्" जड पौद्गलिकाः पदार्थाः क्षणिका नाश स्वभावाश्च सन्ति। एक आत्मैव नित्यः। तथा चोत्पादव्ययध्रौव्य स्वभावाद्व्याः। द्रव्यरूपेणात्मा 'ध्रुवो नित्यः।' गुणापेक्षयोत्पन्न स्वभावी तथा च पर्यायदृष्ट्या व्ययः—विनाशस्वभावी आत्मा, आर्हत दर्शने। नरदेवतिर्यञ्चनारकादिषु आत्मा जन्म धारयति सा स्थितिः पर्यायरूपोच्यते।

आत्मतत्त्व स्वीकारे पुनर्जन्म सिद्धिरपि भविष्यति। 'पुनर्जन्मे' ति शब्दे पुनः जन्म च इति द्वौ शब्दौ। जन्मनि मृत्योरनन्तरमग्निसंस्कारे देहस्य विलयो जात। अतः यद्यात्मा नाङ्गीक्रियते चेत् पुनः चेतनागमनं नावलोक्यते। अत आत्मन एव पुनर्जन्माङ्गीकरणीयम्।

आधुनिक विज्ञानस्य प्रयोगशालायामपि 'क्रायोबायोलोजि' इत्याख्यायां नवीनायां पद्धत्यां मृत शरीरे चेतनापूर्ते प्रयत्नानि प्रचलन्ति, परमेतन्न-भूतं न भविष्यति।

तथा चार्हतैरात्मनः संकोचविकासशीलत्वं गुणत्वेन स्वीक्रियते। यथा विस्तृते कक्षे प्रदीपस्य प्रदेशा-विस्तारेण तिष्ठन्ति सङ्कुचिते लघुकक्षे तस्यैव दीपस्य प्रदेशास्तस्मिन् लघुक्षेत्रे तिष्ठन्ति, तथैवात्मनि संकुचितत्वं विस्तृतत्वं चास्ति। अतः कुञ्जरसदृशे दीर्घकाये य आत्मा तिष्ठति स एवात्मा जन्मान्तरे कीटिकामक्षिकादीनां शरीरेऽपि स्थातुं शक्नोति।

इत्यात्म-मीमांसा भारतीये दर्शने

**सन्दर्भ स्थल—**

१ जीवाजीवा य बंधो य, पुण्णं पावासवो तहा।
संवरो निज्जरा मोक्खो, संते ए तहिया नव॥—उत्तराध्ययन २८।१४

२ गुणपर्यायवद् द्रव्यम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org